38. गयामाहात्म्य. स०

पत्र - 38

1342

11"x5"

श्रीगणेशाय नमः ॥ अथ गयायात्राविधिर्लिख्यते ॥ तत्र कस्मिंश्चिद्दिने एकभुक्ता
दिकं कृत्वा ॥ अधिकारविशेषणत्वेन प्राप्तमुण्डनं चोपवासं विधाय ॥ तदुत्तरदिने चन्द्र
ताराऽनुकूले सावकाशश्राद्धनिषिद्धनन्दादिव्यतिरिक्ता । देवार्च्चनान्तं कर्म्म कृत्वा ॥ गणे
शंग्रहान्निपृदेवतांश्च संपूज्य ॥ कुशत्रयजवतिलजलान्यादाय ॥ ॐ अद्यतीर्थयात्राङ्गं ग
भूतपार्वणश्राद्धमहं करिष्ये ॥ इति संकल्प्य घृतेन श्राद्धं निर्वर्त्य ब्राह्मणत्रयं संपूज्य ॥
हिरण्यादिना सन्तोष्य ॥ ॐ अद्य प्रतिपदाश्वमेधयज्ञजन्यफलसमफलप्राप्तिकामो ग
यायात्रामहं करिष्ये ॥ इति संकल्प्य । तत्रैव मुद्राकंकनकाषाय परिधाय रूपं छत्रोपानहा
दण्डधारणरूपं च कार्प्पटीवेषं कृत्वा ॥ पूर्वाह्णे तीर्थाभिमुखं गच्छेत ॥ भेषधारणानु यात्रां

गत्वाङ्गमनकाले एव न तु भोजनादिकालेपि ॥ इत्थं यावत्तीर्थप्राप्ति प्रत्यहं गच्छेत् ॥
तीर्थेपि तत्र तत्स्नानादिकमनुसारेण कार्य्यमिति वेषं विभृयात् ॥ श्लो० ॥ का० ॥ यस्य हस्तौ च पादौ च
मनश्चापि सुसंयतम् ॥ विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते १ ॥ प्रतिग्रहादुपावृत्तः
संतुष्टो नियतः शुचिः ॥ अहंकारविमुक्तो यः स तीर्थफलमश्नुते ॥२॥ वाराणस्यां कृतं श्राद्धं
तीर्थे शोणनदे तथा ॥ पुनःपुने महानद्यां श्राद्धं स्वर्गं नयेत्पितॄन् ॥३॥ ॥ इति गारु
डे ॥ ततो गयाप्रवेशे च पूर्वतोस्मि महानदी ॥ तत्र तोयं समुत्पाद्य स्नातव्यं निर्मले ज
ले ॥ तत्र प्रथमदिने फल्गुतीर्थे गच्छेत् ॥ ॐ अश्वमेधसहस्रसहस्रयज्ञजन्य फ
लविलक्षणफलप्राप्तिकामः फल्गुतीर्थे स्नानमहं करिष्ये ॥ इति संकल्प्य ॥ यथावि

धिः स्नायात् ॥ प्रकृतस्नानीयसकलमंत्रपाठानन्तरम् ॥ ॐ फल्गुतीर्थे पुण्यजले करोमि

स्नानमादृतः । पितॄणां विष्णुलोकाय भुक्ति मुक्ति प्रसिद्धये ॥१॥ इति पठित्वा स्नायात् ॥ अ

कृतसंध्यावन्दनेन संध्यावन्दनं कर्त्तव्यम् । ततस्तर्प्पणोतुदेवादितर्प्पणं कृत्वा ॥ ॐ अद्या

मुकगोत्रोस्मत्पिता अमुकशर्म्मा तृप्यतामिदं तिलोदकं तस्मै स्वधा ॥ पितरं प्रीणयामि ॥ इति

२ पितुः एवं गजतर्प्पणपर्य्यन्तेषु सर्वत्र तर्प्पणेषु अमुकं प्रीणयामीति योज्यम् ॥ तदुक्तं २

ब्रह्मपुराणे ॥ पितॄन्पितामहांश्चैव तथैव प्रपितामहान् ॥ प्रीणयामीति यत्प्रोक्तं त्वयादलमरि

न्दम ॥१॥ तेनास्मद्युगपद्योगो ज्ञातो वाक्येन सत्तमेति वाराहपुराणवचनात् ॥ ततो देवाश्चैनी

तकर्म्म कुर्य्यात् ॥ ॥ अद्य गयातीर्थप्राप्तिनिमित्तकफल्गुतीर्थाधिकरणपार्वणश्राद्धम

मुका ४

भयः॥२॥ तेषां पिण्डप्रदानार्थमागतोस्मि गयामिमाम्॥ ते सर्वे तृप्तिमयान्तु श्राद्धेनानेन शा
श्वतीम्॥३॥ इति पठित्वा पितॄन्ध्यात्वा सव्यं कृत्वाचम्य संध्यावन्दनधारणाककुम्भकपूरकरेचका
न् प्राणायामान् कृत्वा॥ पुण्डरीकाक्षस्मरणेन श्राद्धाय द्रव्याणि कुशोदकेन संप्रोक्ष्य॥
ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्म्मणाममुकगो
त्राणां मातृपितामहीप्रपितामहीनाममुकामुकीदेवीनाममुकगोत्राणां मातामहप्रमाताम
हवृद्धप्रमातामहानाममुकामुकशर्म्मणाममुकगोत्राणां मातामहीप्रमातामहीवृद्धप्र
मातामहीनाममुकामुकामुकीदेवीनां प्रेतत्वविमुक्तिकामः प्रेतशिलायां श्राद्धमहं करि
ष्ये॥ इति संकल्प्य॥ द्वादशषोडशदैवतं श्राद्धं पार्वणोतिकर्त्तव्यताकं कुर्य्यात्॥ कव्यवाल

मुका ३ मुका ५

२

२

हं करिष्ये ॥ इति संकल्प्य ॥ एवं राजतर्प्पणपर्य्यन्तेषु तत्तर्प्पणेषु मुकं प्रीणयामि स्वधादीरणा
नन्तरं प्रयोजनीयम् ॥ ततो देवार्च्चनं कृत्वा ॥ ॐ अद्य गयातीर्थप्राप्तिनिमित्तकश्राद्धमहं करिष्ये ॥
इति संकल्प्य ॥ अर्घावाहनरहितं स्वसूत्रोक्तरीत्या पार्वणश्राद्धं कुर्य्यात् ॥ तदसंभवे पिण्डदा
नमात्रमपि तीर्थप्राप्तिनिमित्तकं कर्त्तव्यं तद्दिने ॥ ततस्तद्दिन एव महानदीपश्चिमकूलसं
लग्नां गयोत्तरस्थाने प्रेतशिलां गत्वा तत्कर्म्मकर्त्तव्यं तद्यथा ॥ प्रेतशिलायां कृतं पंचग
व्येन भूसंस्कारप्रापणयां आचान्त उपविश्य कृतापसव्यो दक्षिणाभिमुखो भूत्वा ॥ ॐ कव्य
वालो नलस्सोमो यमश्चैवार्य्यमा तथा ॥ अग्निष्वात्ता बर्हिषदस्सोमपाः पितृदेवताः ॥ १ ॥
आगच्छन्तु महाभागा युष्माभिरक्षितास्त्विह ॥ मदीयाः पितरो ये च कुले जातास्सना

मि २

शाश्वतीमित्यंतं पूर्वलिखितमंत्रं पठित्वा सकृत्तिलोदकांजलिदानरूपमावाहनं कृत्वा॥
पूर्ववदभ्यर्च्य। ॐ आब्रह्मस्तम्बपर्य्यन्तमित्यादिसतिलांजलिदानरूपं पूर्ववदावाहनं कृत्वा
चैनं च॥ ॐ पिता पितामहश्चैव तथैव प्रपितामहः॥ माता पितामही चैव तथैव प्रपितामही॥
मातामहस्तत्पिता च प्रमातामहकादयः॥ मातामही प्रमातामही वृद्धप्रमातामह्यपि तेषां
पिण्डो मया दत्तोऽक्षय्यमुपतिष्ठताम्॥ इति पौराणिकमंत्रमुच्चार्य्य तिलघृतदधिमधुयुतं
मुष्टिमितशक्तुकृतं मिलितेभ्यो द्वादशेभ्य एकं पिण्डं दद्यात्॥ ॥ ततः षोडशीकर्मतद्यथा॥
॥ ऊनविंशतिदास्यमानानि यथादक्षिणाकृतानि प्रत्येकं यथादक्षिणं पंचगव्येनालि
प्यते॥ पूर्ववद्दक्षिणाग्रं कुशत्रयं धृत्वा॥ ॐ अस्मत्कुले मृता ये च गतिर्येषां न विद्यते॥

मर ४ ४

मित्यादिशाश्वतीमित्यंतं पूर्वलिखितमंत्रं पठित्वा। तेषुकुशोदकेषुसकृत्तिलोदकांजलि
दानरूपमावाहनंकुर्य्यात्। तत्रएतानिपाद्यादीनिपित्रादिभ्योनमः इत्यनेनक्रमेणपंचोप
चारेणपित्रादीन्संपूज्य॥ ॐ आब्रह्मस्तम्बपर्य्यन्तंदेवर्षिपितृमानवाः॥ तृप्यन्तुपितरः सर्वे
मातृमातामहादयः॥१॥ अतीतकुलकोटीनांसप्तद्वीपनिवासिनाम्॥ आब्रह्मभुवनाल्लोका
दिदमस्तुतिलोदकम्॥२॥ इतिपूर्ववदंजलिदानरूपमावाहनंपमिलितपित्राद्यावाह
नंकुर्य्यात्॥ ततः ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्म्मन्नेषतेपिण्डः स्वधेतितिलजलमधु
दधिमिश्रंपायसान्नतमंपिण्डंपित्रेएवंपितामहादिभ्यएकादशयथादक्षिणान्दद्यात्॥
ततस्तद्दक्षिणतउपविश्यसमूलान्दक्षिणाग्रान्कुशानास्तीर्य्य॥ ॐ कव्यवालइत्यादि

विद्युच्चौरहतायेचतेभ्यः पिण्डंददाम्यहम् ॥७॥ ॐ दावदाहे मृतायेच सिंहव्याघ्रहताश्च ये ॥
दंष्ट्रिभिः शृङ्गिभिर्वापि तेभ्यः ॥८॥ ॐ उद्बन्धनमृतायेच विषशस्त्रहताश्च ये ॥ आत्मनो घा
तिनाये च तेभ्यः ॥१०॥ ॐ अरण्ये वर्त्मनि वने क्षुधया तृषया हताः ॥ भूतप्रेतपिशाचाश्च तेभ्यः ॥
११ ॥ रौरवे चान्धतामिस्रे कालसूत्रे च ये गताः ॥ तेषां ॥१२॥ ॐ अनेकयातनासंस्थाः ये नी

५ ता यमशासनैः ॥ तेषां ॥१३॥ ॐ अनेकयातनासंस्थाः प्रेतलोके च ये गताः ॥ तेषां ॥१४॥ ॐ ५

नरकेषु समस्तेषु यातनासु च ये स्थिताः ॥ तेषां ॥१५॥ पशुयोनिगताये च पक्षिकीटसरी
सृपाः ॥ अथवा वृक्षयोनिस्थास्तेभ्यः ॥१६॥ ॐ यात्यन्तरसहस्रेषु भ्रममन्तः स्वेनकर्म
णा ॥ मानुष्यं दुर्लभं येषां तेभ्यः ॥१७॥ ॐ दिव्यन्तरिक्षभूमिष्ठाः पितरो बान्धवादयः ॥
स्था

आवाहयिष्येतान्सर्वान्कुशपृष्ठेतिलोदकैः॥१॥ॐ मातामहकुलेयेच गतिर्येषांनविद्य

ते॥ आवाहयिष्येः॥२॥ॐ बन्धुवर्गकुलेयेचगतिर्येषांनविद्यते॥ आवाहयिष्येः॥३॥ इति पौरा

णिकमंत्रैरास्तृतदर्भेतानावाह्यगंधादिभिरभ्यर्च्य यदिदेवतापदेषु षोडशीक्रियते तद्देव

तामंत्रेणाभिसंपूज्य॥ॐ आब्रह्मस्तम्बपर्य्यन्तमित्यादि श्लोकाभ्यां पूर्ववदेकवारं मन्त्रे

तिलोदकांजलिं दत्वा॥मूलादितःपिण्डंदद्यात्॥ ॐ अस्मत्कुलेमृतायेच गतिर्येषांन

विद्यते तेषामुद्धरणार्थायइमंपिण्डंददाम्यहम्॥१॥ ॐ मातामहकुलेयेचगतिर्येषां

नविद्यते तेषां॥२॥ ॐ बंधुवर्गकुलेयेचगतिर्येषांनविद्यते तेषां॥३॥ ॐ अजातदंतायेके

चिद्येचगर्भेप्रपीडिताः तेषां॥४॥ ॐ अग्निदग्धाश्चयेकेचिन्नाग्निदग्धास्तथापरे॥

नेर

ताश्चतेभ्यः स्वधापिण्डमहं ददामि ॥२५॥ इति पठित्वा ॥ ॐकारपूर्वमपसव्येन कथितद्रव्ये
ण कथितप्रमाणकान् नवविंशतिपिण्डान् प्रत्येकं दद्यात् ॥ ॥ स्त्री षोडश्यान्तु ॥ ॥ ॐ
अस्मत्कुले मृता याश्च स्त्रीस्त्या वाहनमंत्रादारभ्य मित्राणयः सप्य इत्थं पर्य्यन्तं संभवति स्त्री
लिंगमूहनीयम् ॥ अन्यत् षोडशीवत्सर्वम् ॥ ततः सर्वेषु पिण्डेषु तिलजलपूर्णपात्रे
ण दक्षिणावारत्रयं परिषिंचत्क्रन्तव्यम् ॥ मन्त्रः ॥ ॐ ये च वो ये चास्मांश्च वासं या
श्च वो याश्चास्मान् स्वासं स्ते चावाहन्तांतास्ता वाहन्तां तृप्यन्तु भवन्तस्तृप्यन्तु भवन्त्यस्तृ
प्यत गोत्रान् प्रत्नानभितष्ठियन्तीरापो मधुमतिरिमाः स्वधापितृभ्यो ऽमृतं दुहाना चा
पो देवीरभयास्तर्पयन्तु तृप्यत तृप्यत तृप्यत इति ततः प्रणिपत्य ॥ ॐ पित्रादयः स्स स

मृताश्च संस्कृता ये च तेभ्यः ॥१८॥ ॐ ये केचित्प्रेतरूपेण वर्त्तन्ते पितरो मम ते सर्वे तृप्ति मा
यान्तु पिण्डेनानेन सर्वदा ॥१९॥ ये बांधवा बांधवा वा येऽन्यजन्मनि बान्धवाः ॥ तेषां पिण्डो
मया दत्तोऽक्षय्यमुपतिष्ठताम् ॥२०॥ ॐ पितृवंशे मृता ये च मातृवंशे च ये मृताः ॥ गुरुश्वशु
र बंधूनां ये चान्ये बान्धवा मृताः ॥२१॥ ये मे कुले लुप्तपिण्डाः पुत्रदारविवर्ज्जिताः ॥
क्रियालोपगता ये च जात्यंधाः पंगवस्तथा ॥२२॥ विरूपा आमगर्भाश्च ज्ञाता ज्ञाताः कु
ले मम ॥ तेषां पिण्डो मया दत्तोऽक्षय्यमुपतिष्ठताम् ॥२३॥ ॐ आब्रह्मणो ये पितृवंशजाता
मातुस्तथा वंशभवा मदीयाः ॥ कुलद्वये ये मम दासभूता भृत्यास्तथैवाश्रितसेवकाश्च ॥२४॥
मित्राणि सख्याः पशवश्च वृक्षा दृष्टाश्च दृष्टाश्च कृतोपकाराः ॥ जन्मान्तरे ये मम संग

मुक्य १

ही प्रमातामही वृद्धप्रमातामहीनाममुकाँमुकी देवीनां प्रेतत्वविमुक्तिकामः प्रेतशिलायां पि
ण्डदानमहं करिष्ये ॥ इति संकल्प्यापसव्यं कृत्वा ॥ ॐ कव्यवालोनलः इति पठेत् ॥ तुल्यार
म्यानृणोहमृणात्रयादित्यन्तं काण्डं पूर्वं लिखितं कुर्य्यादिति ॥ केचित्तु षट्पुरुषाणामेव

७ प्रेतत्वविमुक्तिकामनया पिण्डदानं कार्य्यम् । तत्र च वेदीद्वयं कर्त्तव्यम् । तद्रेखातदंगार ७

भ्रमणछिन्नमूलधारणावनेजनपिण्डदानप्रत्यवनेजनश्वासधारणानीवीविस्रंभ
नसूत्रदानानि कार्य्याणि । एतदन्यतमकरणानन्तरं पर्वतादवरुह्य पृथिव्यां प्रभासद्वि
रागतायां महानद्यां रामतीर्थे प्रसिद्धे रामह्रदे ॥ ॐ अद्यसाध्यजन्मान्तरशतकृतदुःक्रा
न्तविलयकामोऽस्मिन् रामतीर्थे स्नानमहं करिष्ये ॥ इति संकल्प्य स्नानतर्पणे कुर्य्यात् ॥

घमितितान्विसर्ज्जयेत् ॥ छ ॥ ततः मातृषोडशी ॥ छ ॥ ॐ गर्भोदरे गते दुःखं विषमे भूमि
वर्त्मनि ॥ तस्य निष्क्रमणार्थीय मातृपिण्डन्ददाम्यहम् ॥ १ ॥ इत्यादि ततः सव्येनाचम्य ब
द्धांजलिः ॥ ॐ साक्षिणः सन्तु मे देवा ब्रह्मेशानादयस्तथा ॥ मया गयां समासाद्य पितृ
णां निःकृतिः कृता ॥ १ ॥ आगतोस्मि गयां देव पितृकार्य्ये गदाधर ॥ त्वमेव साक्षी भगवन्न
नृणोहमृणानयात् ॥ २ ॥ इति प्राञ्जलिः पठेत् ॥ एतावत्क्रियाकलापाशक्तौ प्रेतशिलायां
पिण्डदानमात्रमपि कर्त्तव्यम् ॥ तद्यथा ॥ ॐ अद्यामुकगोत्राणां पितृपितामहप्रपितामहा
मुका २ नाममुकामुकशर्म्मणां अमुकगोत्राणां मातृपितामहीप्रपितामहीनाममुकामुकीदेवी मुका २
नाममुकगोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्म्मणां मातामह
मुका १

८

शंनमस्कारमहंकरिष्ये॥ इतिसंकल्प्यप्रभासेशंनमस्कुर्यात्॥ ॐ एमप्रभासेशंनमस्कु
र्य्यात्॥ ॐ आपस्त्वमसिदेवेश ज्योतिषांपतिरेवच॥ पापंनाशयमेदेवमनोवाक्कायकर्म्म
जम्॥१॥ इतिपौराणिकमंत्रंपठित्वा॥ ॐ यमायैषवलिर्नमः॥ इति कुशयवतिलजलेन
देवरीत्याभक्तादिरूपंवलिंपाङ्मुखोदद्यात्॥ प्रभासपर्वतदक्षिणदिग्वस्थितप्रेतशि
लायांजघनस्थेनगनाम्निपर्वतेगत्वा॥ ॐ श्वानौद्वौश्यामशवलौवैवस्वतकुलोद्भवौ॥
ताभ्यांवलिंप्रयच्छामिस्यातामेताविहिंसकौ॥१॥ इतिपठित्वा॥ यमराजश्वमराजाभ्यांव
लिर्नमः॥ इतितयोर्मिलितयोरोदनान्यतमपिण्डंवलिंदद्यात्॥ इदंचवलिदानंनित्यं
अकरणेअनिष्टश्रवणात्॥ अन्यत्तुसर्वंकाम्यंस्वतन्त्रंचैतेषुयावद्देवकर्त्तुमिष्यतेतावद्द

८

तत्रस्नानीयप्रकृतसकल्पपाठानन्तरम् ॥ ॐ जन्मान्तरशतैः साग्रं यत्कृतं दुःकृतं मया ॥
तत्सर्वं विलयं यातु रामतीर्थेऽभिषेचनात् ॥१॥ इति पौराणिकमन्त्रं पठित्वा मज्जेत् ॥ ॐ
अद्य विष्णुलोकं नयनकामो रामतीर्थे स्नानं चाहं करिष्ये ॥ इति संकल्प्य ॥ श्राद्धपिण्ड
दानमन्त्रं वा कुर्यात् ॥ इदं पार्वणं पिण्डदानं च स्वसूत्रानुसारेणैव कार्यम् ॥ ॐ अद्यपि
तृत्वप्राप्तिकामो रामतीर्थे पितृणां पिण्डदानमहं करिष्ये ॥ इति संकल्प्य ॥ प्रेतशिलोक्त
रीत्या पित्रादिद्वादश पिण्डान्निक्षेप पिण्ड षोडश पिण्डौ दद्यात् ॥ ततः ॐ राम राम महा
बाहो देवानामभयंकर ॥ त्वां नमस्येह देवेश मम नश्यतु पातकम् ॥१॥ इति पठित्वा स्वर्गका
मो रामं नमस्कुर्यात् । तत ॐ अद्य प्रभासमासमानश्च कार्त्तिक शिवलोकगमनकामः प्रभासे

मिश्रशक्तुभिः निःक्षेपमहं करिष्ये॥ इति संकल्प्य तिलमिश्रशक्तून् प्रेतपर्वते दक्षिणाभिमुखः क्षिपेदनेन मंत्रेण॥ ॐ ये के चित्प्रेतरूपेणावर्तन्ते पितरो मम। ते सर्वे तृप्तिमायान्तु शक्तुभिस्तिलमिश्रितैः॥१॥ ॐ आब्रह्मस्तम्बपर्यन्तं यत्किंचित्सचराचरम्॥ मया दत्तेन तोयेन तृप्तिमायान्तु सर्वशः॥२॥ इति मंत्रेण ततो यांजलिं दद्यात्। ततो यथाशक्ति ब्राह्मणाय दक्षिणां द्रव्यं दद्यात्॥ ॥ इति प्रेतपर्वतविधिः॥ ॥ अथ तृतीयदिने कृत्यम्। तत्र फल्गुतीर्थे स्नानादि देवार्चनान्तं कर्म कृत्वा। पवित्रोपग्रहणापाणिराचम्य वारिणा शिरोऽभ्युक्ष्य॥ उत्तरमानसं गत्वा। ॐ अद्य सर्वपापक्षयकाम उत्तरमानसे स्नानमहं करिष्ये॥ इति संकल्प्य स्नानीयमंत्रान् पठित्वा॥ ॐ उत्तरे मानसे स्नानं

१८

वकर्त्तव्यम् ॥ ननु सर्वमित्यवधेयम् ॥ इति गयाकृत्ये प्रथमदिनकृत्यम् ॥ ततो द्वितीयदि
ने फल्गुतीर्थादौ स्नात्वा देवार्च्चनान्तं कर्म्म कृत्वा प्रेतपर्वतं गत्वा ॥ वायव्यां दिशि गयातो ग
व्यूत्यधिकदूरस्थं गत्वा तन्मूलसंलग्नेतदीशानकोणस्थे ब्रह्मकुण्डे स्नायात् ॥ ॐ अद्य
पित्राद्यक्षयस्वर्गकामो ब्रह्मकुण्डे स्नानमहं करिष्ये ॥ इति संकल्प्य यथाविधि स्नानतर्प्प
णान्तं कर्म्म कृत्वा ॥ प्रेतपर्वतमारुह्य पित्राक्वानादि सादि श्रवणपर्य्यन्तं प्रेतशिलावदेव क
र्म्म कर्त्तव्यम् ॥ अयं विशेषः ॥ ॐ अद्य पित्रादीनां पुनरावृत्तिरहितब्रह्मलोकप्राप्तिकामः प्रेत
पर्वते श्राद्धमहं करिष्ये ॥ इति संकल्प्य पार्वणं कुर्यात् ॥ श्राद्धं च ब्रह्मवेद्यां माधारणं ततः साक्षि
श्रवणानन्तरम् ॥ ॐ अद्य पितृगतप्रेतत्वविमुक्तिस्वगतप्रेतत्वाभावकामः प्रेतपर्वते तिल

मातामह्यादित्रिकं वर्ज्जमिति हेमाद्रिः॥ गयायां सर्वत्र षट्पुरुषश्राद्धमिति संप्रदायः तत
एषामन्यतमश्राद्धं कृत्वा तद्दक्षिणादिशि उपविश्य समूलान् कुशानास्तीर्य्य॥ ॐ कव्यवालो
नलः सोमो यमश्चैवार्य्यमा स्तथा॥ अग्निष्वात्ता बर्हिषदः सोमपाः पितृदेवताः॥१॥ आगच्छ
न्तु महाभागा युष्माभी रक्षितास्त्विह॥ मदीयाः पितरो ये च कुले जाताः सनाभयः॥२॥ तेषांपि
ण्डप्रदानार्थमागतोस्मि गयामिमाम्॥ ते सर्वे तृप्तिमायान्तु श्राद्धेनानेन शाश्वतीम्॥३॥
इति पठित्वा सकृत्तिलोदकाञ्जलिदानरूपमावाहनं कृत्वा॥ एतानि पाद्यादीनि पित्रादिभ्यो
नम इति पंचोपचारैर्वा पित्रादीन्संपूज्य॥ ॐ आब्रह्मस्तम्बपर्य्यन्तं देवर्षिपितृमानवाः॥
तृप्यन्तु पितरः सर्वे मातृमातामहादयः॥१॥ अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम्॥

करोम्यात्मविशुद्धये ॥ सूर्य्यलोकादिसंसिद्धिंसिद्धये पितृमुक्तये ॥ इति पठित्वा मज्जनं का
र्य्यम् । तत्र च पित्राद्यंजलिषु स्वधादीरणानन्तरं प्रीणयामीति योज्यं । ततस्तर्पणशेषदे
शविधिना ॥ ॐ आब्रह्मस्तम्बपर्य्यन्तं देवर्षिपितृमानवाः तृप्यन्तु पितरः सर्वे मातृमातामहादयः ॥
१ इति पठित्वा एकोऽञ्जलिर्देयः ॥ ॐ अद्यामुकगोत्राणां पितामहप्रपितामहानाममुकामुका
मुकशर्म्मणां तथामुकगोत्राणां मातृपितामहीप्रपितामहीनाममुकामुकीदेवीनां तथा च अमु
कगोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्म्मणां तथा च अमुकगोत्रा
णां मातामहीप्रमातामहीवृद्धप्रमातामहीनाममुकामुकीदेवीनां शाश्वतब्रह्मलोकप्राप्तिकामो
ऽक्षयतृप्तिकामो वा उत्तरमानसे श्राद्धमहं करिष्ये ॥ इति संकल्प्य ॥ द्वादशदैवतं श्राद्धमाचरेत् ॥

मुक्य२ मुका मुक्य४

दीचीतीर्थस्नानमहं करिष्ये ॥ इति संकल्प्य पूर्ववत्स्नानतर्पणे कृत्वा ततः पूर्ववद्देवद्वादश
देवतं षडदेवतं वा पार्वणं कृत्वा ॥ ॥ मध्ये कनखलं गत्वा तत्रापि ॥ ॥ ॐ अद्य पितृमुक्तिकामः
कनखलतीर्थस्नानमहं करिष्ये ॥ इति संकल्प्य स्नानतर्पणे कृत्वा ॥ ततः पितृमुक्तिकामन
स्नात्वा तत्रापि श्राद्धं कृत्वा ॥ ततः ॐ अद्य पितृमुक्तिकामो दक्षिणमानसे स्नानमहं करिष्ये ॥ इ
ति संकल्प्य ॥ स्नानीयस कलपाठानन्तरम ॥ ॐ दक्षिणमानसे स्नानं करोम्यात्मविशुद्धये ॥
सूर्य्यलोकादिसंसिद्धिः सिद्धये पितृमुक्तये ॥ ब्रह्महत्यादिपापौघघातनाय विमुक्तये ॥
दिवाकर करोमीह स्नानं दक्षिणमानसे ॥ २ ॥ इति पठित्वा मज्जेत् ततः पूर्ववत्तर्पणं कृत्वा ॥ ॐ अ
द्य पितृसूर्य्यलोकप्राप्तिकामः श्राद्धं कुर्य्यात् ॥ ततो मौनार्कं स्यनतिपूजयेत् ॥ ॐ अद्यसूर्य्य

आब्रह्मभुवनाल्लोकाइदमस्तु तिलोदकम् ॥१॥ इति पठित्वा सकृत्तिलोदकाञ्जलिदानक्
पमावाहनं कृत्वा ॥ ॐ पिता पितामहश्चैव तथैव प्रपितामहः । माता पितामही चैव तथैव प्रपि
तामही ॥१॥ मातामहस्तत्पिता च प्रमातामहकादयः । तेषां पिण्डो मया दत्तोऽक्षय्यमुपतिष्ठता
म् ॥२॥ इति पौराणिकमंत्रमुच्चार्य्य तिलघृतदधिमधुजलयुतं मुष्टिमितशक्तुमेकं पिण्डं
मिलितेभ्यो द्वादशेभ्यो दद्यात् ॥ ॐ अद्य पित्रादीनां सूर्य्यलोकनयनकाम उत्तरार्कस्य न
ति पूजनमहं करिष्ये ॥ पूजायामप्येवं संकल्प्य ॥ ॐ नमोस्तु भानवे भर्त्रे सोमभौमज्ञरू
पिणे ॥ जीवभार्गवशौरेयराहुकेतुस्वरूपिणे ॥१॥ इति मंत्रेण नतिः पूजा कार्य्या ॥ ततोऽनन्त
रं मौनेन दक्षिणामानसं गत्वा ॥ तत्रोत्तरभागे उदीच्याम ॥ ॐ अद्य पितृमुक्तिकाम उ

ॐ अद्य दशलक्षाश्वमेधयज्ञजन्यफलविलक्षणफलप्राप्तिकामः फल्गुतीर्थस्नानमहं
करिष्ये ॥ इति संकल्प्य प्रफल्गुस्नानीयमंत्रपाठान्ते ॥ ॐ फल्गुतीर्थपुण्यजले करोमि स्नान
मादृतः ॥ पितॄणां विष्णुलोकाय भुक्तिमुक्तिप्रसिद्धये ॥१॥ इति पठित्वा निमज्जेत् । ततः ॐ अद्य
पितृमुक्तिकामनया फल्गुतीर्थे श्राद्धं पिण्डदानं वाहं करिष्ये ॥ षोडशदैवतं द्वादशदैवतं
नवदैवतं षड्दैवतं वा श्राद्धं कुर्य्यात् ॥ ततो मधुश्रवा दक्षिणदिशि व्यवस्थितं पितामहं नम
स्कुर्य्यात् ॥ ॐ नमः शिवाय देवाय ईशानपुरुषाय च । अघोरवामदेवाय सद्योजाताय शंभवे ॥
१ ॥ इति पठित्वा पितामहं प्रणमेत् पूजयेद्वा ततः पुनः फल्गुतीर्थमागत्य ॥ ॐ अद्य पित्रादि
सहितात्मवैष्णवपदनयनकामः फल्गुतीर्थे गदाधरदर्शनमहं करिष्ये ॥ इति संकल्प्य ॥ त
त्र स्नानं कर्त्तव्यम् ॥ गदाधरस्य प्रतिमारूपं तदधिकरणभूतमुण्डपृष्ठादिरूपश्चेति तद्दर्शना

तृप्तिपितृगणातारणपुत्रपौत्रधनैश्वर्य्यमायुरारोग्यवृद्धिकामोदक्षिणार्कनममहंकरिष्ये ॥
पूतिसंकल्प्य । ततः ॐ नमामिसूर्य्यंतृप्त्यर्थं पितॄणांतारणाय च । पुत्रपौत्रधनैश्वर्य्यमा
युरारोग्यवृद्धये ॥ १ ॥ इतिमंत्रेणदक्षिणार्कस्यनतिः पूजाकार्या । तस्यतुकर्म्ममौनेनकर्त्तव्य
म् ततः समौनपिण्डपातनम् । ॐ कव्यवालोनलः सोमोयमश्चैवार्य्यमातथा ॥ अग्नि
ष्वात्ताबर्हिषदः सोमपाः पितृदेवताः ॥ १ ॥ आगच्छन्तुमहाभागायुष्माभीरक्षितास्त्विह ॥
मदीयापितरोयेचकुलेजाताः सनाभयः ॥ २ ॥ तेषांपिण्डप्रदानार्थमागतोस्मिगयामिमा
म् । तेसर्वेतृप्तिमायान्तुश्राद्धेनानेनशाश्वतीम् ॥ ३ ॥ इत्यादिगयामिमामित्यंतं ॥ इतिदक्षि
णामानसएवंपठित्वा ॥ गदाधरपूर्वदेशस्थमतिप्रशस्तंफल्गुतीर्थंगच्छेत ॥ ॥ तत्रच

श्राद्धे नान्तं कर्म्म कृत्वा ॥ कुशत्रयतिलजलान्यादाय ॥ ॐ अद्य पितृब्रह्मलोकनयनकामो
धर्म्मारण्यगमनमहं करिष्ये ॥ इति संकल्प्य प्रकृतपार्वणं कुर्यात् ॥ ततो मतङ्गवाप्यामेव उत्तर
दिग्भागस्थितं मातङ्गेशं नत्वा ॥ ॐ प्रमाणं देवताः सन्तु लोकपालाश्च साक्षिणः मयागत्य मत
ङ्गेऽस्मिन्पितृणां निःकृतिः कृता ॥१॥ पार्वणं कुर्यात् ॥ कूपश्वासमेतदाप्या प्रेयस्कोणक्षेत्र म
ध्ये रहटकूपोस्ति तत्तीरे श्राद्धं पिण्डदानं वा पतितस्य गर्भहंतृ गुरुतल्पगइत्येवं निर्द्दिशः
ततो धर्म्मेश्वरं महाबोधितरुं नमेत ॥ ॐ नमस्तेऽश्वत्थराजाय ब्रह्मविष्णुशिवात्मने ॥ बोधिद्रु
माय पितृणां कर्तृणां तारणाय च ॥१॥ एकादशोसि रुद्राणां वसूनामष्टमो वसुः ॥ नारायणो
सि देवानां वृक्षराजोसि पिप्पल ॥२॥ येऽस्मत्कुले मातृवंसे वांधवा दुर्गतिं गताः ॥ त्वद्दर्शना

नन्तरम्॥ ॐ नमोस्तु वासुदेवाय नमः संकर्षणाय च॥ प्रद्युम्नायानिरुद्धाय श्रीधराय च वि
ष्णवे॥ इति पठित्वा गदाधरं प्रणमेत्पूजयेच्च ततः उत्तरमानसं गत्वा॥ ॐ पितृब्रह्मलोकं न य
न्कामः पंचतीर्थी स्नानमहं करिष्ये इति संकल्प्य॥ उत्तरमानसे उदीच्यां कनखले दक्षिणा
मानसे फल्गुतीर्थे यथाक्रमं सविधिवत् प्रत्येकं स्नानतर्प्पणं कुर्य्यात्॥ ततो गदाधरसमीपं गत्वा॥
ततो दुग्धदधिघृतखराडात्मकेन पंचामृतेन त्र्यंशोत्तरशतपल परिमितेन गदाधरं स्नापयित्वा॥
पुष्पवस्त्राद्यलंकारैरर्च्चयेत्॥ एतेषां च कर्म्मणां मध्ये गदाधरं पंचामृतस्नपमानवेष्टकर्म्म
ण्यकरणे निदादि पंचतीर्थीकृत्यम्॥ इतराणि तु काम्यानि स्वतंत्राणि चेति शक्तिकार्य्याणी
ति॥ ॐ॥ इति पंचतीर्थीकृत्यम्॥ अथ पंचतीर्थीदिनाप्रथमदिनकृत्यम्॥ फल्गुतीर्थे स्नात्वा दे

ॐ अश्मास्मिन् ब्रह्मशिरोद्भूतो सर्वदेवमयन्तरुम् । विष्णुरूपं प्रसिंचामि पितॄणां च विमुक्तये ॥१॥
इति पठित्वा कुशत्रयेण चम्प ब्रह्मशिरोजलेन गोप्रचारसमीपस्थान ब्रह्मप्रकल्पितांम्रं
सिञ्चेत् ॥ ॐ अद्य वाजपेययज्ञजन्यफलप्राप्तिकामो ब्रह्मयूपप्रदक्षिणामहं करिष्ये ॥ इति
संकल्प्य ॥ ॐ नमो ब्रह्मणोऽब्जाय जगज्जन्मादिकारिणे । भक्तानां च पितॄणां च तारणाय
नमो नमः ॥१॥ इति पठित्वा ब्रह्मशिरो वायव्यकोणस्थं ब्रह्माणं प्रणमेत् ॥ ॐ यमराजधर्मम
राजौ निश्चलार्थं स्थिरीकृतौ ताभ्यां बलिं प्रयच्छामि पितॄणां मुक्तिहेतवे ॥ इति पठित्वा ॥
यमायैष बलिर्नमः ॥ इत्यनेन कुशोदकेन देवद्वयम्बलिं दद्यात् ॥ द्वौ श्वानौ श्यामशबलौ
वैवस्वतकुलोद्भवौ । ताभ्यां बलिं प्रयच्छामि रक्षेतां पथि सर्वदा ॥१॥ इति पठित्वा ॥ ॐ शुनए

१४

स्पर्शनाच्च स्वर्गतिं यान्तु शाश्वतीम्॥३॥ ऋणत्रयमयादत्तं गयामागत्य ब्रह्मसरात् त्वमस्मा
दान्महापापाद्विमुक्तोऽहं भवार्णवात्॥४॥ अथ पंचतीर्थीदिनोत्तरतृतीयदिनकृत्यम्॥ फ
ल्गुतीर्थे स्नानतर्प्पणादेवार्च्चनान्तं कर्म्म कृत्वा॥ ततो ब्रह्मशरं गत्वा॥ ॐ अद्य पापाप
क्षयकामो ब्रह्मशरसि स्नानमहं करिष्ये॥ इति संकल्प्य प्रकृतमंत्रं पठित्वा॥ ॐ स्नानं करोमि
तीर्थेऽस्मिन् ऋणत्रयविमुक्तये॥ श्राद्धाय पिण्डदानाय तर्प्पणायात्मशुद्धये॥१॥ इति पठि
त्वा तर्प्पणं कृत्वा॥ ॐ अद्य पितृब्रह्मलोकनयनकामो ब्रह्मकूपयूपयोर्म्मध्ये श्राद्धमहं करि
ष्ये॥ इति संकल्प्य॥ द्वादशदैवतं नवदैवतं षड्दैवतं श्राद्धं कृत्वा उत्तरमानसवत्॥ अक्षय
पिण्डं दत्वा॥ ॐ अद्य पितृमोक्षकामो ब्रह्मप्रकल्पितताम्रसेचनमहं करिष्ये॥ इति संकल्प्य॥

१५

स्पर्शनमहं करिष्ये॥ इति संकल्प्य॥ स्पृष्ट्वा श्राद्धीयद्रव्याणि सिंचेत॥ ॐ अद्यात्मसहितकुलशत
तशिवपुरनयनकामोहं रुद्रपदे श्राद्धमहं करिष्ये॥ इति संकल्प्य॥ द्वादश दैवतं नव दैवतं श्राद्धं
कुर्यात॥ ततो विष्णुपदसमीपं गत्वा॥ ॐ अद्य पितृमोक्षकामो विष्णुपदपूजनमहं करिष्ये॥
इति संकल्प्य॥ विष्णुप्रकाशकमंत्रेण पंचोपचारैः संपूजयेत॥ ततः श्राद्धीयद्रव्यं पुण्डरीका
क्षस्मरणपूर्वकं कुशोदकेन प्रोक्ष्य॥ ॐ अद्यात्मसहितकुलसहस्रोद्धरणपूर्वकविष्णुलोक
नयनकामो विष्णुपदे सपिण्डकश्राद्धमहं करिष्ये॥ इति संकल्प्य॥ द्वादशदैवतं षड्दैवतं वा
स विश्वेदेवपार्वणश्राद्धं कृत्वा॥ तद्देवीं दक्षिणत उपविश्य यः कल्पपत्रमः॥ श्वेतशिलास्थानी
य कर्म कुर्यात॥ दण्डप्रदर्शये द्विष्णु गयां गत्वान्न पिण्डदः॥ दण्डं न्यस्त्वा विष्णुपदे पिण्डमिस्स

१५

षवलिर्नमः॥ इति देवव्रह्म दर्भोदकेन स्ववलिं दद्यात्॥ ॐ ऐंद्रवारुणवायव्या याम्या वैर्ऋति
स्तथा॥ वायसाः प्रतिगृह्णन्तु भूमौ पिंडं मयोज्झितम्॥१॥ इति पठित्वा॥ ॐ काकेभ्यः एष वलिर्न
मः॥ इति दर्भोदकेन देवव्रह्मा काकवलिं दद्यात्॥ काकवल्यनन्तरं स्नानं॥ इति पंचतीर्थीदिनोक्त
तृतीयदिनकृत्यम्॥ अथ पंचतीर्थीदिनोत्तर चतुर्थदिनकृत्यं॥ ततः ॐ अद्येद शाम्वमेधय
ज्ञजन्यफलविलक्षणफलप्राप्तिकामः फल्गुतीर्थे स्नानमहं करिष्ये॥ इति संकल्प्य फल्
तस्नानमंत्रान्ते॥ ॐ फल्गुतीर्थे पुण्यजले करोमि स्नानमादृतः॥ पितृणां विष्णुलोका
य भुक्तिमुक्तिप्रसिद्धये॥१॥ इति पठित्वा फल्गुतीर्थे मज्जेत्॥ ततस्तर्प्पणमुक्तरीत्यैव कु
र्यात्॥ ततः पदेषु श्राद्धं तत्रादौ रुद्रपदसमीपं गत्वा॥ ॐ अद्य पुनरावृत्तिरहितकामो रुद्रपद

श्राद्धमहं करिष्ये॥ ततो इन्द्रपदसमीपं गत्वा॥ ॐ अद्य पितृशक्रलोकनयनकाम इन्द्रपदे श्राद्धमहं करिष्ये॥ ततो सूर्यपदसमीपं गत्वा॥ ॐ अद्य पतितपितृसूर्यलोकनयनकामः सूर्यपदे श्राद्धमहं करिष्ये॥ ततो कार्तिकेयपदसमीपं गत्वा॥ ॐ अद्य शिवलोकगमनकामः कार्तिकेयपदे श्राद्धमहं करिष्ये॥ ततो अगस्त्यपदसमीपं गत्वा॥ १६

ॐ अद्य पितृब्रह्मलोकनयनकामोऽगस्त्यपदे श्राद्धमहं करिष्ये॥ ततो क्रौंचपदसमीपं गत्वा॥ ॐ अद्य पितृब्रह्मलोकनयनकामः क्रौंचपदे श्राद्धमहं करिष्ये॥ ततो कश्यपपदसमीपं गत्वा॥ ॐ अद्य पितृब्रह्मलोकनयनकामः कश्यपपदे श्राद्धमहं करिष्ये॥ ततो चन्द्रपदसमीपं गत्वा॥ ॐ अद्य पितृचन्द्रलोकगमनकामश्चन्द्रपदे श्राद्धमहं करि

हमुच्यते ॥१॥ इति वायुपुराणवचनात् ॥ ॥ ततो ब्रह्मपदसमीपं गत्वा ॥ ॥ ततः ॐ अद्यात्मसहि
तकुलशतनरकोद्धरणपूर्वकब्रह्मलोकनयनकामो ब्रह्मपदे श्राद्धमहं करिष्ये ॥ इति संक
ल्प्य ॥ रुद्रपदवत् श्राद्धं कुर्यात् ॥ ततो दक्षिणाग्निपदसमीपं गत्वा ॥ ॥ ॐ अद्य वाजपेयफ
लप्राप्तिकामो दक्षिणाग्निपदे श्राद्धमहं करिष्ये ॥ ततो गार्हपत्यपदसमीपं गत्वा ॥ ॥ ॐ अ
द्य राजसूययज्ञफलप्राप्तिकामो गार्हपत्ये पदे श्राद्धमहं करिष्ये ॥ ॥ ततो आहवनीयपद
समीपं गत्वा ॥ ॥ ॐ अद्याश्वमेधयज्ञफलप्राप्तिकाम आहवनीयपदे श्राद्धमहं करिष्ये ॥
ततो सभ्यपदसमीपं गत्वा ॥ ॥ ॐ अद्य ज्योतिष्टोमयज्ञफलप्राप्तिकामः सभ्यपदे श्राद्ध
महं करिष्ये ॥ ततो आवसथ्यपदसमीपं गत्वा ॥ ॥ ॐ अद्य सोमलोकप्राप्तिकामो आवसथ्यपदे

ॐ अद्यामुकगोत्रस्यामुकशर्म्मणो मोक्षप्राप्तिकामो गयाशिरसि पिण्डदानमहं करिष्ये ॥
इति संकल्प्यान्नेजनादि पिण्डसमुत्थापनपर्यन्तं कर्म्म कुर्य्यात् ॥ ० ॥ एवं पिण्डदानं जि
ह्वालोले । मधुश्रवा । मुण्डपृष्ठे । दक्षिणमानसाभ्यन्तरे ॥ १ ॥ गदाधरवासादि प्रदेशे क्वापि क
र्त्तव्यम् ॥ अथ पंचतीर्थ्युत्तरपंचदिनकृत्यम् ॥ कुत्र कुत्रापि कृतदेवार्च्चनान्तं कर्म्म ॥ ० ॥ गदालो
लं गत्वा ॥ ० ॥ ॐ अद्य पापक्षयस्वर्गकामो गदालोले स्नानमहं करिष्ये ॥ इति संकल्प्य ॥ गदा
लोले स्नायात् ॥ ततः प्रकृतपाठानन्तरम् ॥ ॐ गदालोले महातीर्थे गदाप्रक्षालने वरे ॥ स्ना
नं करोमि शुद्ध्यर्थमक्षय्यायस्वर्गप्राप्तये ॥ १ ॥ इति पठित्वा मज्जेत् ॥ ततस्तर्पणं कृत्वा । ततः ॐ अ
द्य पितृब्रह्मलोकनयनकामो गदालोले श्राद्धमहं करिष्ये ॥ इति संकल्प्य श्राद्धं कुर्य्यात् ॥

ष्ये ॥ ततो गणेशपदसमीपं गत्वा ॥ ॐ अद्यपितृशिवलोकगमनकामः गणेशपदे श्रा
द्धमहं करिष्ये ॥ ततो दधीचपदसमीपं गत्वा ॥ ॐ अद्यपितृब्रह्मलोकगमनकामः द
धीचपदे श्राद्धमहं करिष्ये ॥ ततो मतङ्गपदसमीपं गत्वा ॥ ॐ अद्यपितृब्रह्मलोकगम
नकामो मतङ्गपदे श्राद्धमहं करिष्ये ॥ ततो कण्वपदसमीपं गत्वा ॥ ॐ अद्यपितृब्रह्म
लोकगमनकामः कण्वपदे श्राद्धमहं करिष्ये ॥१०॥ यथोपक्रमं सर्वत्र श्राद्धं कुर्य्यात् ॥ अन्य
षुपदेषु पितृब्रह्मलोकगमनफलम् ॥ अथ गयाशिरसि ॥ ॐ अद्यामुकगोत्रस्या
मुकशर्म्मणः स्वर्गप्राप्तिकामो गयाशिरसि पिण्डदानमहं करिष्ये ॥ इति संकल्प्य स्वस्वतो
त्कारीत्यावाहनेजनादि पिण्डसमुत्थापनपर्य्यन्तं कर्म कुर्य्यात् ॥ ततस्तत्रैव ॥ ॥

१८

गनिद्रया॥ वालरूपधरस्तस्मै नमस्ते योगशायिने १ इति मंत्रेण प्रणामेत्॥ ॐ ततः संसार
वृक्षस्तस्यायाशेषपापहराय च॥ अक्षयब्रह्मदात्रे च नमोऽक्षयवटाय वै॥ २॥ इति मंत्रेण
क्षयवटं नमस्कुर्यात्॥ ॐ अद्य पितृब्रह्मलोकनयनकामो वटेश्वरदर्शनमहं करिष्ये॥ ततः
वटेश्वरं पूजयेन्नमेत्॥ ॐ अद्य पितृरुद्रलोकनयनकामः प्रपितामहेश्वरं नमस्कार
महं करिष्ये॥ इति संकल्प्य॥ ॐ कल्लोमाहेश्वरालोकाये नतस्माद्रुदाधरः॥ लिंगरूपो भ
वतांच वंदे श्रीप्रपितामहम् १॥ इति मंत्रेण प्रपितामहं प्रणामेत्॥ ततोऽक्षयवटे गोदानस्तु
तिः॥ ततः सुवर्णशृंगां गांहृप्यखुरां गोपुच्छं धृत्वा कामास्तु तीर्थ याशास्त्वं पठेत्॥ शुक्लां वर
वरः शुक्ल मुक्तागंधानुलेपनः॥ सवैः पुष्पैः सर्वगन्धैः स्नापितो वेदपुंगवैः १॥ ततः

१८

यद्दिपिण्डदानमात्रं क्रियते तदाप्ययमेव संकल्पः॥ पिण्डदानं स्वसूत्रोक्तरीत्या कार्य्य
म्॥ ततोऽक्षयवटं गत्वा॥ ततोऽक्षयवटोत्तरपितामहसन्निधि दक्षिणादिग्भागे पितॄ
णामक्षयतृप्तिकामः अक्षयवटे श्राद्धमहं करिष्ये॥ इति संकल्प्य श्राद्धं कुर्य्यात॥ ततः
ॐ पितृब्रह्मलोकनयनकामो ब्रह्मप्रकल्पितान्त्रीन्ब्राह्मणान्तद्दशनको एकमपि
भोजयेत्॥ तत्र संकल्पः॥ ॐ अद्य कोटिब्राह्मणभोजनयज्ञजन्यफलप्राप्तिकामः अ
क्षयवटे त्रीन्ब्राह्मणान् एकं वा ब्राह्मणमहं भोजयिष्ये॥ अक्षयवटं प्रति माहृपं पश्ये
त॥ अनेनैव क्रमेणापि पूजां कुर्य्यात॥ तत्र संकल्पवाक्येन पदस्थानेन तिपदमक्षयं न
तौनु॥ ततो वटेशं प्रणमेत॥ पितृब्रह्मलोकनयनकामः॥ ॐ एकार्णवे वटस्याग्रे यः शेते यो

१९

कुलत्राह्मणायतानयनंवात्रफलसंध्योपासनस्नानेचस्वतंत्रेद्वयोर्विश्वजित्याग्रस्व
र्गफलम्॥ ॐ अद्यपितृत्रक्षयस्वर्गकामोगायत्रीतीर्थेसपिण्डकश्राद्धमहंकरिष्ये॥ इति
संकल्प्यपूर्वोक्तरीत्याप्रकारेणसपिण्डकश्राद्धंकुर्य्यात्॥ ततःसावित्र्याःपुरतःसमुद्यंतना
मतीर्थेमध्याह्नेयथाविधिस्नात्वा॥ ॐ अद्यमध्याह्नेकुलशतब्राह्मणायतानयनकामःसा
वित्रीपुरतःस्थितसमुद्यंततीर्थेसंध्योपासनमहंकरिष्ये॥ ततःसायाह्नेसरस्वत्याअग्रतः
प्राचीसरस्वत्यांयथाविधिस्नात्वा॥ ॐ अद्यसायाह्नेकुलसर्वज्ञतानयनकामःसरस्वत्या
अग्रस्थितप्राचीसरस्वत्यांसायंसंध्योपासनमहंकरिष्ये॥ इतिसंकल्प्य॥ ॐ अद्यबहुजन्म
कृतसंध्यालोपजनितदोषमुक्तकामोगायत्रीसावित्रीसरस्वतीस्थानेषुक्रमेणसंध्यात्र

प्राङ्मुखः कपिलां समर्च्चयेत॥ ॥ या लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता॥ धेनु
रूपेण सा देवी मम पापं व्यपोहतु॥१॥ देहस्था या च रुद्राणी शंकरस्य सदा प्रिया॥ धेनुरूपेण
सा देवी मम पापं व्यपोहतु॥२॥ विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च विभावसोः॥ चन्द्रार्क्क
योस्तु शक्तिर्या धेनुरूपास्तु सा श्रिया॥३॥ चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च
लक्ष्मीर्या लोकपालानां सा धेनुर्वरदास्तु मे॥४॥ स्वधा त्वं पितृमुख्यानां स्वाहा यज्ञभुजां
तथा॥ सर्वपापहरा धेनुस्तस्माच्छांतिं प्रयच्छ मे॥५॥ ॥ ॥ इत्यावश्यकं कर्मेण कल्यम्॥ ॥
पूर्वदिने कृतोपवासो गयाग्राममध्यस्थे गायत्रीतीर्थे सन्मुखप्राग्देशे महानद्यां गयातीर्थे
स्नात्वा॥ प्रातःसंध्योपासनं कुर्य्यात्॥ तत्रापि तर्प्पण स्नानादौ च स्वर्गफलम्॥ ततः ॐ अद्य

जलान्यादाय॥ ॐ अद्यत्रिसप्तकुलोद्धरणकाम इमां गां सवत्सां रुद्रदैवतां यथालंकृतां स-
हितां यथानामगोत्राय ब्राह्मणाय तुभ्यमहं संप्रददे॥ इति गां दद्यात्। ततो गृहीता स्वस्तीति वदे-
त्। ततो दाता॥ ॐ अद्य कृतैतद्गोदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायामुकश-
र्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे॥ इति गृहीता गृहीतसुवर्णां गां पुच्छे धृत्वा कामास्त-
तिं यथाशास्त्रं पठेत्॥ ॐ अद्य पितृस्वर्गलोकनयनकामो देवनद्यां पिण्डदानमहं करिष्ये॥ इ-
ति संकल्प्य स्वसूत्रानुसारेण पिण्डदानं कुर्य्यात्॥ एवमेव गोचारमानसपदे देविकायां पु-
ष्करिण्यां घृतकुल्यायां मधुकुल्यायां अमरकण्टके कोटितीर्थे रुक्मिणीकुण्डे प्रत्येकं पि-
ण्डप्रत्येकस्वर्गनयनफलं संकल्प्य पिण्डं दद्यात्॥ ततः ॐ अद्य पितृतारणकामो मार्क-
ण्डेयेशकोटिनमस्कारमहं करिष्ये॥ इति संकल्प्य नमस्कुर्य्यात्॥ एवमेव कोटीशनमस्का-

२०

यमहं करिष्ये इति संकल्प्य पूर्वोक्तरीत्या श्राद्धं कुर्य्यात् ॥ पिण्डदानाक्षेपे प्येदमेव फल
म् ॥ ❀ ॥ एवं लेलिहाने भरताश्रमपदांकिते मुण्डपृष्ठागदाधरसमीपाकाशगंगागिरिकर्णी
मुखेषु श्राद्धं पिण्डदानं वा कुर्य्यात् ॥ तथा गोदायां वैतरण्यां च पिण्डदाने वामत्येकफलं विं
शतिकुलोद्धारणं गयाक्षेत्रे पितृणां तारणाय च फलम् ॥ वैतरणीव भस्मकूटस्थि देवनदी पू
र्वश्चत्र च स्मरणे श्रावारघाशोमन्त्रः ॥ ॐ अद्य त्रिसप्तकुलोद्धरणकामो वैतरण्यां स्नानमहं क
रिष्ये ॥ इति संकल्प्य वैतरण्यां स्नात्वा ॥ ॐ यास्ते वैतरणीनाम नदी त्रैलोक्यविश्रुता ॥ सावती
र्णा गयाक्षेत्रे पितृणां तारणाय वै ॥ इति मंत्रेणाशरितां तरेत् ॥ ततो गोदानम् ॥ ॐ गवे नमः ॥
इति गां संपूज्य ॥ ॐ वासरणाय नमः इति वासरणांत्रिः संपूज्य ॥ गां संप्रोक्ष्य ॥ कुशत्रयतिल

२१

श्राद्धं कुर्य्यात् ॥ एवमेवाहं सतीर्थेपि संकल्प्य ॥ महानद्यां हंसप्रपतनं महातीर्थम् ॥ ॐ
अद्य शिवपुरनयनकामो दशाश्वमेधे नमस्कारमहं करिष्ये । एवमेव नमस्कारान्तरेपि
संकल्प्य ॥ ॐ अद्य पितृब्रह्मलोकनयनकामो मतंगपदे श्राद्धमहं करिष्ये ॥ इति संकल्प्य ।
श्राद्धं कुर्य्यात् ॥ ॐ अद्य मुक्तिकामो मथोकुण्डे स्नानमहं करिष्ये ॥ इति संकल्प्य स्नायात् ॥
ॐ अद्य पितृमुक्तिकामो मथोकुण्डतर्पणमहं करिष्ये ॥ एवमेव पिण्डदानेपि संकल्प्य ॥
ॐ अद्य पितृस्वर्गनयनकामो रामेश्वरं नमस्कारमहं करिष्ये ॥ इति संकल्प्य नमस्कुर्य्यात् ॥
ॐ अद्य पितृगतिस्वर्गकामो गयाकूपे श्राद्धमहं करिष्ये ॥ इति संकल्प्य ॥ पतितादीनाम
पि पित्रादीनां श्राद्धं कुर्य्यात् ॥ एवमेव पिण्डदानं च ॥ इति हरिहरस्मरता कर्त्तव्यम् ॥ ॐ
अद्य पितृतारणकामो गयाकूपभस्मना स्नानमहं करिष्ये ॥ इति संकल्प्य स्नायात् ॥

२१

ऽपि संकल्प्य ॥ ः ॥ ॐ अद्य पित्रादि पूतत्व नरकस्वर्गलोकनयनफलं पाण्डुशिलादर्शन
महं करिष्ये ॥ इति संकल्प्य नमस्कुर्यात् ॥ पाण्डुशिलां पश्येत् ॥ ॐ अद्याश्वमेधायुतफलका
मः शिलासंगतायां घृतकुल्यायां स्नानमहं करिष्ये ॥ इति संकल्प्य यथाविधि स्नायात् ॥
एवमेव देविकायां महानद्यां मधुश्रवायां संकल्प्य यथाविधि स्नायात् ॥ ॐ अद्य कुलसह
स्रसमुद्धरणपूर्वक विष्णुपदनयनकामः शिलासहितां घृतकुल्यायां पित्रादितर्पणमहं
करिष्ये ॥ इति संकल्प्य पित्रादीन् तर्पयेत् ॥ एवमेव सपिण्डश्राद्धेऽपि संकल्प्य ॥ एवं मधुकुल्या
दावपि ॥ उद्भिज्ज स्वेदज अण्डज जरायुजानां मधुश्रवायां मरणे विष्णुपरगमनफलं
ॐ अद्य पित्रादि ब्रह्मलोकनयनकामो दशाश्वमेधके श्राद्धमहं करिष्ये ॥ इति संकल्प्य ॥

श्राद्धमहं करिष्ये इति संकल्प्य ॥ आद्यगदाधरस्मरणात् श्राद्धं कुर्यात् ॥ ॐ अद्य पित्रादिस्व
र्गनयनकामः फल्ग्वीशनमस्कारमहं करिष्ये ॥ इति संकल्प्य फल्ग्वीशं पूजयेत् ॥ चण्डेश
श्मशानेश पूजायामप्येतदेव फलम् ॥ ॐ अद्य मुक्तिकामो गयागजमहं पूजयिष्ये ॥

इति संकल्प्य गयागजं पूजयेत् ॥ गयादित्यगदाधरमहानदीदेवनदीउदीचीकन
खलन्दा पूजायामप्येतदेव फलम् ॥ गयाकूटगृध्रकूटान्तरमानसमध्यगयाशिरः पू
जायामप्येतदेव फलम् ॥ ॐ अद्य पितृसप्तकुलोद्धरणकामो गयायां वृषोत्सर्गमहं करि
ष्ये ॥ इति संकल्प्य वृषमुत्सृजेत् ॥ भरताश्रमे महानद्यां स्नात्वा रामेसं सीतां च नत्वा ॥ राम
राम महाबाहो देवानामभयंकर । त्वां नमस्येह देवेश मम नश्यतु पातकम् ॥१॥ इति पठित्वा ॥

२२

ततोरामपुष्करिरायां यथाविधिस्नायात्॥ ॐ अद्यपितृब्रह्मलोकनयनकामो रामपुष्करि
रायांश्राद्धमहं करिष्ये॥ इति संकल्प्य श्राद्धं कुर्य्यात्॥ ततो वशिष्ठतीर्थे यथा विधिस्नात्वा॥
ॐ अद्याश्वमेधफलप्राप्तिकामो वशिष्ठे शनमस्कारमहं करिष्ये॥ इति संकल्प्य नमस्कु
र्य्यात्॥ ॐ अद्यपितृब्रह्मलोकनयनकामो धेनुकाररायेपिराडदानमहं करिष्ये॥ इति सं
कल्प्य पिराडं दद्यात्॥ कामधेनुपदस्नानेकामधेनुनमस्कारे वैभदेवफलम्॥ ततः
कर्द्दमालेगयानाभौ यथाविधिस्नात्वा॥ ॐ अद्यपितृस्वर्गनयनकामः कर्द्दमालेगया
नाभौश्राद्धमहं करिष्ये॥ इति संकल्प्य तत्र श्राद्धं कुर्य्यात्॥ चरिडकाफल्गीशचराडेशन
मकारेपि एतद्देवफलम्॥ ॐ अद्यशतकुलसमुद्धरणापूर्वकब्रह्मलोकनयनकामः
स

ॐ अद्य पित्रादिकुलशतस्वविष्णुपदगमनकामो रामेश संनिधाने रामपदे श्राद्धमहं करिष्ये॥ इति संकल्प्य श्राद्धं कुर्यात्॥ ॐ अद्य पितृस्वर्नयनकामो मतंगपदे पिण्डदानमहं करिष्ये॥ इति संकल्प्य पिण्डं दद्यात्॥ उद्यन्तकुण्डे मध्याह्ने स्नात्वा॥ ॐ अद्य कोटिजन्मावछिन्न पितृप्रत्यभवनकाम उद्यन्तकुण्डे मध्याह्ने संध्यावन्दनमहं करिष्ये॥ इति संकल्प्य संध्यामुपासीत॥ अगस्त्यपदे यथाविधि स्नात्वा॥ ॐ अद्य दिवौकोगणपूज्यमानायुसहित ब्रह्मलोकनयनकामोऽगस्त्यपदे पिण्डदानमहं करिष्ये॥ इति संकल्प्य पिण्डं दद्यात्॥ ॐ अद्य योनिशंकटविमुक्तिपूर्वकपरब्रह्मगमनकामो ब्रह्मयोनिप्रवेशनिर्गममहं करिष्ये॥ इति संकल्प्य ब्रह्मयोनिप्रवेशनिर्गमौ कुर्यात्॥ ॐ अद्य ब्रह्मराय कामो गयाकुमारनमस्कारम

हं करिष्ये॥ इति संकल्प्य॥ गयाकुमारं नमस्कुर्यात्॥ ॐ अद्य पितृसोमलोकगमनकामः सोम
कुण्डे स्नानमहं करिष्ये॥ इति संकल्प्य स्नायात् तत्र तर्प्पण पिण्डदानयोर् प्रेतदेव फलम्॥
ॐ अद्य ऋणमोक्षकामः काकशिलायां काकेभ्यो वलिदानमहं करिष्ये॥ इति संकल्प्य व
लिं दद्यात्॥ ॐ अद्य स्वर्गप्राप्तिपूर्वक ब्रह्मलोकप्राप्तिकामः स्वर्गेशनमस्कारमहं करिष्ये॥

२२ इति संकल्प्य स्वर्गेशं नमस्कुर्यात्॥ ॐ अद्य स्वजैमिल्यपितृनिर्मल्यकाम आकाशगंगा २२

यां पिण्डदानमहं करिष्ये॥ इति संकल्प्य पिण्डं दद्यात्॥ ॐ अद्य स्वस्वर्गप्राप्तिकामो भस्मकूट
पर्वते भस्मना स्नानमहं करिष्ये॥ इति स्नायात्॥ ॐ अद्य स्व स्वर्गकामः पिप्पलेशनमस्का
रमहं करिष्ये॥ इति संकल्प्य नमस्कुर्यात्॥ एतत्पूजायाम प्रेतदेव फलम्॥ ॐ अद्य

स्वर्गकामो माहेश्वरीकुण्डे श्राद्धमहं करिष्ये ॥ इति संकल्प्य नमस्कृत्य पिण्डं दद्यात् ॥ एवं रुक्मिणीकुण्डे श्राद्धमप्येतदेव फलम् ॥ ॐ अद्य सर्वसौभाग्यप्राप्तिकामो मंगला पूजनमहं करिष्ये ॥ इति संकल्प्य माहेश्वरीकुण्डस्थितां मंगलां पूजयेत् ॥ ॥

॥॥ इति श्रीवाचस्पतिविरचिते तीर्थचिन्तामणौ गयाप्रयोगपद्धतिः समाप्ता ॥ श्रीसंवत १९०२ शाल ॥ आश्विने मासे कृष्णपक्षे चतुर्दश्यां भौमवासरे सम्पूर्णम् ॥ ॥ लिखिताकरणसिंहेन राजपूत वाशी गयाजी के ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री यो देषा सो लिषा मम दोष न दीयते चतुर जन समुझ लेव हाल लिषक के ॥ श्री श्री सीताराम ॥ श्रीराधाकृष्ण ॥ श्रीरामलक्ष्मण जानकी जै बोलो हनुमान की श्री श्री

२४

२५

च कुले जाताः सनान्नयः ॥ ११ ॥ तेषां पिण्डप्रदानार्थमागतोस्मि गयामिमाम् ॥ ते सर्वे
तृप्तिमायांतु श्राद्धेनानेन शाश्वतीम् ॥ १२ ॥ आचम्योक्ताच्च पंचांगं प्राणायाम्यत्रयं ततः ॥
पुनरावृत्तिरहितं ब्रह्मलोकाप्तिहेतवे ॥ १३ ॥ एवं च विधिवत् श्राद्धं कृत्वा पूर्वं यथाक्रमम् ॥
पितॄनावाह्य चाभ्यर्च्य मंत्रैः पिण्डप्रदोत्तरेन ॥ १४ ॥ आदौ प्रेतशिलातीर्थे चरुणा सघृ
तेन वा ॥ प्रक्षाल्य पूर्ववत्तत्स्थानं पंचगव्यैः पृथक्पृथक् ॥ १५ ॥ स्वैर्मंत्रैरर्थसम्पूज्य पंचगव्ये
ष्वदेवताम् ॥ याश्च तिला गृहीतास्त्र मनुष्यैः पितृकर्मसु ॥ १६ ॥ गच्छंति तावदसुराः सिंहत्र
स्ता यथा मृगाः ॥ श्रेष्ठका सुतथा वृद्धो गयायां चाक्षयेहनि ॥ १७ ॥ मातुः श्राद्धं पृथक् कुर्यादन्य

२५

शौचपादौ चमनश्चापि स्वसंयतम्॥ विद्यातपश्च कीर्तिश्च सतीर्थफलमश्नुते॥५॥ ततो
गङ्गाप्रवेशे च पूर्वतोस्ति महानदी॥ तत्रतोयं समुत्पाद्य स्नातव्यं निर्मले जले॥६॥ देवादीं
स्तर्पयित्वाथ श्राद्धं कृत्वा यथाविधि॥ स्ववेदशाखागदितमर्घ्यावाहनवर्जितम्॥७॥
अपरेह्नि शुचिर्भूत्वा गच्छेद्वै प्रेतपर्वतम्॥ ब्रह्मकुण्डे ततः स्नात्वा देवादींस्तर्पयेत्सुधीः॥
८॥ कुर्याच्छ्राद्धं सपिण्डानां प्रयत्नतः प्रेतपर्वते॥ प्राचीनावीतिना वाच्यं दक्षिणाभिमु
खस्मरन्॥९॥ कव्यवालोनलः सोमो यमश्चैवार्य्यमा तथा॥ अग्निष्वात्ता वर्हिषदः सोम
पाः पितृदेवताः॥१०॥ आगच्छन्तु महाभागा युष्माभिर्रक्षितास्त्विह॥ मदीयाः पितरो ये

मातापितामही चैव तथैव प्रपितामही॥ मातामहस्तत्पिता च प्रमातामहकादयः॥२५॥
तेषां पिण्डो मया दत्तो ह्यक्षय्यमुपतिष्ठताम्॥ मुष्टिमात्रप्रमाणं वा आर्द्रामलकमात्रक
म्॥२६॥ समीपत्र प्रमाणं वा पिण्डं दद्याद्‌द्विजाशिरे॥ उद्धरेत्सप्तगोत्राणां कुलमेकोत्तरं शत
म्॥२७॥ पितुर्मातुश्च पत्न्या आर्य्यायाश्च भगिन्या दुहितुस्तथा॥ पितृष्वसुर्मातृष्वसुः सप्तगोत्राः
प्रकीर्तिताः॥२८॥ चतुर्विंशति विंशश्च षोडश द्वादशैव हि॥ रुद्रा दश वसवश्च कुलान्येक
कोत्तरं शतम्॥२९॥ नावाहनं न दिग्बन्धो न दोषो दृष्टिसंभवः॥ सकारुण्यैः प्रकर्तव्यं ती
र्थश्राद्धं विचक्षणैः॥३०॥ पिण्डासनं पिण्डदानं पुनः प्रत्यवनेजनम्॥ दक्षिणा चान्न

२६

त्रपतिनासह॥ वृद्धिश्राद्धे त्रिमात्रादिगयायां पितृपूर्वकम्॥१८॥ पादपूर्वं समास्तीर्य दक्षि
णाग्रैः कुशैः क्रमात्॥ पित्रादीनां समास्तीर्य शेषं गृह्योक्तमाचरेत्॥१९॥ कृत्वा श्राद्धं सपि
ण्डानां तेषां दक्षिणाग्रतः॥ कुशानास्तीर्य विधिना सकृद्दत्वा तिलोदकम्॥२०॥ गृहीं
त्वांजलिना तेभ्यः पितृदेवतीर्थेन तत्वतः॥ शक्तुना मुष्टिमात्रेण दद्यादक्षय्यपिण्डकम्॥
॥२१॥ संबंधिनस्तिलाद्भिश्च कुशेषावाहयेत्ततः॥ आब्रह्मस्तंबपर्यंतं देवर्षिपितृमानवाः॥
॥२२॥ तृप्यंतु पितरः सर्वे मातृमातामहादयः॥ अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम्॥
॥२३॥ आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम्॥ पिता पितामहश्चैव तथैव प्रपितामहः॥२४॥

संकल्पस्तीर्थश्राद्धेष्वयं विधिः ॥२१॥ अस्मत्कुले मृता ये च गतिर्येषां न विद्यते ॥ आवाहयिष्ये
तान्सर्वान्कुशपृष्ठे तिलोदकैः ॥२२॥ मातामहकुले ये च गतिर्येषां न विद्यते ॥ आवाहयिष्ये०
॥२३॥ बंधुवर्गकुले ये च गतिर्येषां न विद्यते ॥ आवाहयिष्ये ॥२४॥ इत्येतैः सजलैर्मंत्रैस्तिलै
र्दर्भेषु ध्यातवान् ॥ आवाह्याभ्यर्चिते त्वत्र पिंडं दद्याद्यथाक्रमम् ॥२५॥ अस्मत्कुले मृता
ये च गतिर्येषां न विद्यते ॥ तेषामुद्धरणार्थाय इमं पिंडं ददाम्यहम् ॥२६॥ मातामहकुले ये
च गतिर्येषां न विद्यते तेषा० ॥२७॥ बंधुवर्गकुले ये च गतिर्येषां न विद्यते ॥ तेषा० ॥२८॥ अ
जातदंता ये केचिद्ये चान्ये गर्भप्रपीडिताः ॥ तेषा० ॥२९॥ अग्निदग्धाश्च ये केचिन्नाग्निदग्धा

२८

स्तयापरे ॥ विद्युच्चौरहताये च तेभ्यः पिण्डं ददाम्यहम् ॥४०॥ दावदाहे मृताये च सिंहव्याघ्र
हतास्तथा ये ॥ दंष्ट्रिभिः शृंगिभिर्वापि तेभ्यः ॥४१॥ उद्बंधनमृताये च विषशस्त्रहतास्तथा ये ॥
आत्मनोघातिनोये च तेभ्यः ॥४२॥ अरण्ये वर्त्मनि वने क्षुधया तृषयाहताः ॥ भूतप्रेतपिशा
चाश्चतेभ्यः ॥४३॥ रौरवे चान्धतामिश्रे कालसूत्रे च ये स्थिताः ॥ तेषां ॥४४॥ अनेकयातनासंस्था
ये नीता यमकिंकरैः ॥ तेषां ॥४५॥ नरकेषु समस्तेषु यातनासु च ये स्थिताः ॥ तेषां ॥४६॥ पशुयोनि
गताये च पक्षिकीटसरीसृपाः ॥ अथवा वृक्षयोनिस्थास्तेभ्यः ॥४७॥ जात्यंतरसहस्रेषु भ्र
मंतः स्वेनकर्मणा ॥ मानुष्यं दुर्लभं येषां तेभ्यः ॥४८॥ दिव्यंतरीक्षभूमिष्ठाः पितरो बांध

२८

त्रादयः मृताश्चसंस्कृता ये च ते न्ये ॥ ४९ ॥ ये के चित्प्रेतरूपेण वर्त्तन्ते पितरो मम ॥ ते सर्वे तृप्ति

मायांतु पिण्डेनानेन सर्वदा ॥ ५० ॥ ये वांधवा वांधवा वा ये न्यजन्मनि वांधवाः ॥ तेषां पिण्डो मया

दत्तो ह्यक्षय्यमुपतिष्ठताम् ॥ ५१ ॥ पितृवंशे मृता ये च मातृवंशे च ये मृताः ॥ गुरुश्वशुरवंधूनां ये

चान्ये वांधवा मृताः ॥ ५२ ॥ ये मे कुले लुप्तपिण्डाः पुत्रदारविवर्जिताः ॥ क्रियालोपगता ये च या

त्यंधाः पंगवस्तथा ॥ ५३ ॥ विरूपा आमगर्भाश्च ज्ञाताज्ञाताः कुले मम ॥ तेषां पिण्डो मया दत्तो

ह्यक्षय्यमुपतिष्ठताम् ॥ ५४ ॥ आब्रह्मणो ये पितृवंशजाता मातुस्तथा वंशभवा मदीयाः ॥ कु

लद्वये ये मम दासभूता भृत्यास्तथैवाश्रितसेवकाश्च ॥ ५५ ॥ मित्राणि शिष्याः पशवश्च वृक्षा

दृष्टाह्यदृष्टाश्च कृतोपकाराः॥ जन्मांतरे ये मम संगताश्च तेभ्यः स्वधा पिण्डमहं ददामि॥ पदे

एताश्च सर्वमंत्रास्तु स्त्रीलिंगांतान्समुद्धरेच॥ पिण्डं दद्याद्यथा पूर्वं स्त्रीणां मात्रादिकान्

क्रमात्॥ ५७॥ स्वगोत्रे परगोत्रे वा दंपत्योः पिण्डपातनम्॥ अष्टथकृतिः फलं श्राद्धं पिण्डं सू

दकतर्पणे॥ ५८॥ पिण्डपात्रेति स्नान्त्वा पूरयित्वा कुशोदकैः॥ परिषिंच्य त्रिधा सर्वान्प्रणिप

त्य क्षमापयेत॥ ५९॥ पित्ःन्विसृज्य चौम्य साक्षिणः श्रावयेत सुरान॥ साक्षिणः संतु मे दे

वा ब्रह्मेशानादयस्तथा॥ ६०॥ मया गयां समासाद्य पितृणां निःकृतिः कृता॥ आगतोऽस्मि

गयां देव पितृकार्ये गदाधर॥ ६१॥ ॐ ॐ ॐ॥ इति श्रीवायुपुराणे श्वेतवाराह

२८

कल्येगयामाहात्म्ये षष्ठमोध्यायः॥ ॥ श्री ॥ श्रीसनत्कुमार उवाच॥ ॥ श्री॥ ७॥ ७॥

आदौ तु पंचतीर्थेषु चोत्तरे मानसे विधिः॥ आचम्य कुशहस्तेन शिरस्यान्युक्ष्य वारिणा॥१॥
उत्तरं मानसं गच्छेन्मंत्रेण स्नानमाचरेत्॥ उत्तरे मानसे स्नानं करोम्यात्मविशुद्धये॥२॥
सूर्य्यलोकादिसंसिद्धिः सिद्धये पितृमुक्तये॥ स्नात्वाथ तर्प्पणं कृत्वा श्राद्धं कुर्य्यात्सपि
ण्डकम्॥३॥ शाश्वतं ब्रह्मलोकाप्तैः पितॄणां मुक्तयेपि वा॥ मानसं हि शरो यस्मात्तस्मादुत्तर
मानसम्॥४॥ सूर्य्यं नत्वार्चयित्वाथ सूर्य्यलोकं नयेत्पितॄन्॥ नमोस्तु भानवे भर्त्रे सोमभौ
मज्ञरूपिणे॥५॥ जीवभार्गवशनैश्चरे राहुकेतुस्वरूपिणे॥ उत्तरान्मानसान्मौनी व्रजेद्दक्षिणा

२९

मानसम् ॥ ६ ॥ उदीचीतीर्थमित्युक्तं तत्रोदीच्यां विमुक्तिदम् । तत्र स्नातो दिवं याति स्वशरीरे-
ण मानवः ॥ ७ ॥ मध्ये कनखलं तीर्थं त्रिषु लोकेषु विश्रुतम् । स्नातः कनकवद्भाति नरो याति
पवित्रताम् ॥ ८ ॥ तस्य दक्षिणभागे तु तीर्थं दक्षिणमानसम् । दक्षिणे मानसे चैव तीर्थत्रय-
मुदाहृतम् ॥ ९ ॥ स्नात्वा तेषु विधानेन श्राद्धं कुर्य्यात् पृथक् पृथक् । दक्षिणे मानसे स्नानं
करोम्यात्मविशुद्धये ॥ १० ॥ सूर्य्यलोकादिसंसिद्धिसिद्धये पितृमुक्तये । ब्रह्महत्यादिपापौ-
घघातनाय विमुक्तये ॥ ११ ॥ दिवाकर करोमीह स्नानं दक्षिणमानसे । सूर्य्यं नत्वा च वैयित्वाथ
सूर्य्यलोकं नयेत्पितॄन् ॥ १२ ॥ नमामि सूर्य्यं तृप्त्यर्थं पितॄणां ~~कर्त्तॄणां श्राद्धतः सदा~~
तारणाय च ॥ पुत्रपौत्रधनैश्वर्य्यमायुरारोग्यवृद्धये ॥ १३ ॥ एतत्तीर्थत्रये मौनी स्नानश्राद्धादिकं चरेत् ॥
फल्गुतीर्थं व्रजेत्तस्मात्सर्वतीर्थोत्तमोत्तमम् ॥ १४ ॥ मुक्तिश्चैव भवति पितॄणां कर्त्तॄणां श्राद्धतः सदा ॥

२९

ब्रह्मणा प्रार्थितो विष्णुः फल्गुको ह्यभवत्पुरा ॥ १५ ॥ दक्षिणाग्निहुतं नूनं तद्वत् फल्गुतीर्थकम् ॥ तीर्थानि यानि सर्वाणि भुवनेष्वखिलेष्वपि ॥ १६ ॥ तानि स्नातुं समायांति फल्गुतीर्थे सुरैः सह ॥ गंगा पादोदकं विष्णोः फल्गुर्ह्यादिगदाधरः ॥ १७ ॥ स्वयं हि द्रवरूपेण तस्माद्गंगाधिकं फलम् ॥ अश्वमेधसहस्राणां सहस्रं यः समाचरेत् ॥ १८ ॥ नासौ तत्फलमाप्नोति फल्गुतीर्थे यदाप्नुयात् ॥ फल्गुतीर्थे नरः स्नात्वा तर्पणं श्राद्धमाचरेत् ॥ १९ ॥ सपिंडकं स्वसूत्रोक्तं नमेद्यः पितामहम् ॥ नमः शिवाय देवाय ईशान पुरुषाय च ॥ २० ॥ अघोर वामदेवाय सद्योजाताय शंभवे ॥ फल्गुतीर्थे नरः स्नात्वा दृष्ट्वा देवं गदाधरम् ॥ २१ ॥ आत्मा

नेतारयेत्सर्वोदश पूर्वान्दश परान्॥ नत्वा गदाधरं देवं मंत्रेणानेन पूजयेत्॥२२॥ न
मोस्तु वासुदेवाय नमः संकर्षणाय च॥ प्रद्युम्नायानिरुद्धाय श्रीधराय च विष्णवे॥२३॥
पंचतीर्थ्यां नरः स्नात्वा ब्रह्मलोकं नयेत्पितॄन्॥ अमृतैः पंचभिः स्नानं पुष्पवस्त्राद्यलं
३० कृतम्॥२४॥ न कुर्याद्यो गदापाणेस्तस्य श्राद्धं निरर्थकम्॥ नागकूटाद्गृध्रकूटाद्यूपाद्योत्त ३०
रमानसम्॥२५॥ एतद्गयाशिरः प्रोक्तं फल्गुतीर्थं तदुच्यते॥ प्रथमे ह्येविधिः प्रोक्तो द्वितीये
दिवसे व्रजेत्॥२६॥ धर्मारण्ये तत्र धर्मो यस्माद्यज्ञमकारयेत्॥ गमनाद्ब्रह्मलोकान्निर्ज
न्मस्ये ब्रह्मिनारद॥२७॥ मतंगवाप्यां यः स्नात्वा तर्पणं श्राद्धमाचरेत्॥ गत्वा नत्वा मतंगेशं

मिमंमंत्रमुदीरयेत ॥१८॥ प्रमाणं देवताः संतु लोकपालाश्च साक्षिणः ॥ मयागत्य मतंगेऽस्मि
न्पितॄणां निष्कृतिः कृता ॥१९॥ नत्कूपयूपयोर्मध्ये सर्वान्तारयते पितॄन् ॥ धर्म्मं धर्मेश्वरं
नत्वा महाबोधितरुं नमेत ॥२०॥ नमस्तेऽश्वत्थराजाय ब्रह्मविष्णुशिवात्मने ॥ बोधिद्रुमाय पि
तॄणां कर्तॄणां तारणाय च ॥२१॥ एकादशोऽसि रुद्राणां वसूनामष्टमो वसुः ॥ नारायणोऽसि
देवानां वृक्षराजोऽसि पिप्पल ॥२२॥ येऽस्मत्कुले मातृवंशे बांधवाः दुर्गतिं गताः ॥ त्वद्दर्शना
त्स्पर्शनाच्च स्वर्गतिं यांतु शाश्वतीम् ॥२३॥ ऋणत्रयं मया दत्तं गयामागत्य वृक्षराट् ॥ त्वत्प्रसादा
न्महापापाद्विमुक्तोऽहं भवार्णवात ॥२४॥ तृतीये ब्रह्मशिरसि स्नात्वा श्राद्धं सपिण्डकम् ॥

कृत्वा सर्वप्रमाणेन मंत्रेणाविधिवत्स्तुतः ॥ ३५ ॥ स्नानं करोमि तीर्थेस्मिन्नृणत्रयविमु
क्तये ॥ श्राद्धाय पिण्डदानाय तर्पणायात्मशुद्धये ॥ ३६ ॥ तद्ब्रह्मयूपयोर्मध्ये ब्रह्मलोकं न
येत्पितॄन् ॥ यागं कृत्वोच्छिन्नो यूपो ब्रह्मणो यूपइत्यसौ ॥ ३७ ॥ कृत्वा ब्रह्मशरः श्राद्धं सवी
नारयते पितॄन् ॥ ब्रह्माणं च नमस्कृत्य ब्रह्मलोकं नयेत्पितॄन् ॥ ३८ ॥ नमो ब्रह्मणोब्जाय
जगज्जन्मादिकारिणे ॥ जनकानां च पितॄणां च तारकाय नमो नमः ॥ ३९ ॥ गोप्रचारस
मीपस्था आम्रा ब्रह्मप्रकल्पिताः ॥ तेषां सेचनमात्रेण पितरो मोक्षगामिनः ॥ ४० ॥ आम्रं
ब्रह्मशरोद्भूतं सर्वदेवमयं तरुम् ॥ विष्णुरूपं प्रसिंचामि पितॄणां मुक्तिहेतवे ॥ ४१ ॥ एको

२१

मुनिः कुंभकुशाग्रहस्तश्चाम्रस्य मूले सलिलं ददानः ॥ आम्रश्च सिक्ताः पितरश्च तृप्ता एका
क्रिया ह्यर्थकरी प्रसिद्धाः ॥ ४२ ॥ यूपं प्रदक्षिणीकृत्य वाजपेयफलं लभेत ॥ ततो यमबलिं
दद्यान्मंत्रेणानेन संयतः ॥ ४३ ॥ यमराज धर्मराजौ निश्चलार्थं व्यवस्थितौ ॥ ताभ्यां बलिं
प्रयच्छामि पितॄणां मुक्तिहेतवे ॥ ४४ ॥ ततः श्वानबलिं दद्यान्मंत्रेणानेन नारद ॥ द्वौ श्वानौ
श्यामशबलौ वैवस्वतकुलोद्भवौ ॥ ४५ ॥ ताभ्यां बलिं प्रयच्छामि स्यातामेतावहिंसकौ ॥
ततः काकबलिं दत्वा पुनः स्नानं समाचरेत ॥ ४६ ॥ ऐंद्रवारुणवायव्या याम्या वै नैरृतिस्त
था ॥ वायसाः प्रतिगृह्णंतु भूमौ पिण्डं मयोज्झितम ॥ ४७ ॥ फल्गुतीर्थे चतुर्थेऽह्नि स्नानादा

दिकं समाचरेत् ॥ गयाशिरसि यः श्राद्धं पदे कुर्य्यात्तु पिण्डकम् ॥४८॥ साक्षाद्गयाशिरस्त
त्र फल्गुतीर्थाश्रितं कृतम् ॥ नागाज्जनार्द्दनाद्ब्रह्मयूपाच्चोत्तरमानसात् ॥४९॥ एतद्गया
शिरः प्रोक्तं फल्गुतीर्थं तदुच्यते ॥ पितामहं समासाद्य यावदुत्तरमानसम् ॥५०॥ फल्गुतीर्थं
तु विज्ञेयं देवानामपि दुर्ल्लभम् ॥ पितामहं समासाद्य यावद्दक्षिणमानसम् ॥५१॥ क्रौंच
पादात्फल्गुतीर्थं यावत्तत्साक्षाद्गयाशिरः ॥ मुण्डं गयासुरस्यैतत्तस्माच्छ्राद्धमथाक्षयम् ॥
॥५२॥ मुण्डपृष्ठं नगाधस्तात्साक्षात्तत्फल्गुतीर्थकम् ॥ आद्यो गदाधरो देवो व्यक्ताव्यक्ता
त्मना स्थितः ॥५३॥ विश्वादिपदरूपेण पितॄणां मुक्तिहेतवे ॥ तत्र विष्णुपदं दिव्यं दर्शना

३२

स्नापनाच्छतम् ॥५४॥ स्पर्शनात्पूजनाच्चैव पितॄणां दत्तमक्षयम् ॥ श्राद्धं सपिण्डकं कृत्वा
कुलसाहस्रमात्मना ॥५५॥ नयेद्धि सुपदं दिव्यमनन्तं शिवमव्ययम् ॥ श्राद्धं कृत्वा रुद्रपदे न
येत् कुलशतं नरः ॥५६॥ सहात्मना शिवपुरं तथा ब्रह्मपदे नरः ॥ ब्रह्मलोकं कुलशतं समुद्धृ
त्य नयेत्पितॄन् ॥५७॥ दक्षिणाग्निपदे श्राद्धी वाजपेयफलं लभेत् ॥ गार्हपत्यपदे श्राद्धी
राजसूयफलं लभेत् ॥५८॥ श्राद्धं कृत्वाहवनीये ह्यश्वमेधफलं लभेत् ॥ श्राद्धं कृत्वा स
भ्यपदे ज्योतिष्टोमं समश्नुते ॥५९॥ आवसथ्यपदे श्राद्धी सोमलोकमवाप्नुयात् ॥ श्राद्धं
कृत्वा शक्रपदे इन्द्रलोकं नयेत्पितॄन् ॥६०॥ अगस्त्यस्य पदे श्राद्धी ब्रह्मलोकं नयेत्पितॄन् ॥

३२

क्रौंचमातंगयोःश्राद्धीपितॄन्ब्रह्मपुरंनयेत् ॥९१॥ श्राद्धीसूर्य्यपदेपंचपापिनोऽर्कपुरंनये-
त् ॥ कार्त्तिकेयपदेश्राद्धीरुद्रलोकंनयेत्पितॄन् ॥९२॥ गणेशस्यपदेश्राद्धीपितॄन्शिवपु-
रंनयेत् ॥ कश्यपस्यपदेश्राद्धीब्रह्मलोकंनयेत्पितॄन् ॥९३॥ गजकर्णिकायांतर्प्यणांकृन्ति
म्मिलनःस्वर्णयेत्पितॄन् ॥ अन्येषांचपदेश्राद्धीपितॄन्ब्रह्मपुरंनयेत् ॥९४॥ सर्वेषांकश्यपंश्रे-
ष्ठंविष्णोर्रुद्रस्यवापदम् ॥ ब्रह्मणश्चपदंवापिश्रेष्ठंतत्रप्रकीर्त्तितम् ॥९५॥ प्रारंभेचसमाप्तौ
चतेषामन्यतमंस्मृतम् ॥ श्रेयस्कांचेतत्रश्राद्धकर्तुश्चनारद ॥९६॥ ॥ ॥ ॥
॥इतिश्रीवायुपुराणेश्वेतवाराहकल्पेगयामाहात्म्येसप्तमोध्यायः॥ सनत्कुमारउवाच ॥

३३

यज्ञंचक्रेगयोराजावह्वन्नंबहुदक्षिणम्॥यत्रद्रव्यसमूहानांसंख्याकर्त्तुंनशक्यते॥१॥
सिकतावायथालोकेयथावादिवितारकाः॥तथारत्नसुवर्णाणिद्यैरसंख्यातास्तुदक्षिणाः॥२॥
नचेहपूर्वंकेचिच्चनकरिष्यंतिचापरे॥स्थितागयायामन्नानांपर्वताःपंचविंशतिः॥३॥प्र
हर्षंतिद्विजास्तुष्टादेशोदेशेतुपूजिताः॥दानातिशयमालोक्यसर्वेविस्मादयःसुराः॥४॥
संतुष्टागयंराजानंवरान्ब्रूहीतिचाब्रुवन्॥गयस्तान्प्रार्थयामासब्रह्मन्निशप्तास्तुयेपुरा॥
॥५॥ब्रह्मणास्तेद्विजाःपूताजायंतुक्रतुपूजिताः॥गयाश्राद्धविधानायद्विजामूर्त्तिश्चतुर्दश॥
॥६॥तेषांवाक्यंप्रकुर्वीतयदिब्रह्मास्वयंव्रजेत्॥गौतमंकश्यपंकौत्संकौशिकंकण्वमेवच॥७॥

२४

भारद्वाजंह्यौशनसंवात्स्यंपाराशरंतथा॥हरित्कुमारंमाण्डव्यंलौकाक्षिंचतपोधनम्॥
८॥वाशिष्ठंचतथान्येऽपिगंगोनारायणेयथाचतुर्दश॥गयापुरीतिमन्नाम्नाख्यातुब्रह्मपुरीतथा॥९॥
एवमस्तुवरंदत्वाततस्तांतर्दधुःसुराः॥गयस्त्वनोगानसंभुज्यविष्णुलोकंपरंययौ॥१०॥
विशालायांविशालोऽभूद्राजपुत्रोऽब्रवीद्द्विजान्॥कथंपुत्रादयोमेस्युर्विशालंचाब्रुवन्द्वि
जाः॥११॥गयायांपिण्डदानेनतवसर्वंभविष्यति॥विशालोऽपिगयाशीर्षेपिण्डदःपुत्रवा
न्[भवेत्]॥१२॥दृष्ट्वाकाशेसितंरक्तंकृष्णंपुरुषमब्रवीत्॥केयूयंतेषुचैवैकःसितःप्रोचेविशाल
कम्॥१३॥अहंसितस्तेजनकइंद्रलोकादिहागतः॥ममपुत्रपितारक्तोब्रह्महापापकृत्तमः॥
॥१४॥अयंपितामहःकृष्णोह्यृषयोयेनघातिताः॥अवीचीनरकंप्राप्तौमुक्तौत्वत्पिण्डदान

तः ॥१५॥ त्वया मुक्तिकृताः सर्वे व्रजामः स्वर्गमव्ययम् ॥ पितॄन्पितामहांश्चैव तथैव प्रपिताम
हान् ॥१६॥ मीणायामिच यल्लोयं त्वयादत्तमरिंदम ॥ तेनास्मद्युगपद्योगो जातो वाक्येन सत्त
म ॥१७॥ एवं पुत्रैः पितॄणां च कर्त्तव्या मुक्तिरुत्तमा ॥ त्वं च राज्यं चिरं कृत्वा पालयित्वा द्वि
जान्प्रजाः ॥१८॥ यज्ञान्सदक्षिणान्कृत्वा अंते विष्णुपुरं व्रज ॥ एवं लब्ध्वा वरो राजा राज्यं
भुक्त्वा दिवं ययौ ॥१९॥ प्रेत राजः सह प्रेतैर्गयाश्राद्धाद्दिवं गतः ॥ प्रेतः कश्चित्तु मुक्त्यर्थं
वणिजं कंचिदब्रवीत् ॥२०॥ प्रेतैः सर्वैः सहात्मनेस्वकृतं भुज्यते फलम् ॥ दत्तः पुरा समध्या
ह्ने जीवनायोपतिष्ठते ॥२१॥ ममनाम्ना गयाशीर्षे पिण्डनिर्वपनं कुरु ॥ प्रेतत्वाद्विमुक्तय

थिं त्वं गृहाण धनं मम ॥२२॥ तद्धनं सर्वमादाय गयायां यज्ञे व्ययं कुरु ॥ धनस्यैतस्य षष्ठांशं तु
न्यं वै दत्तवानहम् ॥२३॥ स्वनामानि यथान्यायं सम्यगाख्यास्समाहितैः ॥ गृहीत्वा तद्धनं स
र्वं निर्वृत्तो गृहमात्मनः ॥२४॥ स्वांसं निःक्षिप्य तत्रासौ शेषमादाय निर्ययौ ॥ गत्वा वणिग्गया

शीर्षे प्रेतराजस्य पिण्डकम् ॥२५॥ प्रददौ मनुजैः सार्द्धं स्वपितृभ्यस्ततो ददौ ॥ प्रेतः प्रेतत्व

३५

निर्मुक्तो वणिक्स्वगृहमागतः ॥२६॥ एवं गयस्य शंभोश्च क्षेत्रं विष्णोरवेस्तथा ॥ उपोषिता
ऽथ गायत्रीतीर्थे महानदीस्थिते ॥२७॥ गायत्र्याः पुरतः स्नात्वा प्रातःसंध्यां समाचरेत् ॥ श्रा
द्धं सपिण्डकं कृत्वा नयेद्ब्रह्मलगयतां कुलम् ॥२८॥ तीर्थे समुद्यते स्नात्वा सावित्र्याः पुरतो नरः ॥

संध्यामुपोष्य मध्याह्ने नयेत्कुलशतं दिवम्॥२९॥ पिण्डदानं ततः कुर्य्यात् पितॄणां मुक्तिकाम्यया॥ प्राचीसरस्वतीतीर्थे स्नात्वापि च यथाविधिः॥३०॥ संध्यामुपोष्य स्नायाह्ने नयेत्कुलशतं दिवम्॥ बहुजन्मकृता संध्यालोपामुच्यते त्रिसांध्यकृत॥३१॥ विशालायां लेलिहाने तीर्थे च चरताश्रमे॥ पादांकिते मुण्डपृष्ठे गदाधरसमीपतः॥३२॥ तीर्थे चाकाशगंगायां गिरिकर्णामुखेषु च॥ स्नातोथ पिण्डदो ब्रह्मलोकं कुलशतं नयेत्॥३३॥ देवनद्यां वैतरण्यां पिण्डदः स्वर्गायेत् पितॄन्॥ स्नातो गोदो वैतरण्यां त्रिसप्तकुलमुद्धरेत्॥३४॥ सत्यं सत्यं पुनः सत्यं वैतरण्यां च नारद॥ एकविंशतिकुलानि तारयेन्नात्र संशयः॥३५॥ त्रिरात्र्युपोषणेनै

व्रतीर्थाद्विनिगमनेन च ॥ स्वदत्वा कांचनं गाश्च दरिद्रो जायते नरः ॥ ३८ ॥ शिलायां संग

मो यत्र तत्र प्रोक्ता मधुश्रवाः ॥ स्वस्तुतं चाश्वमेधानां स्नानं कल्प न्नते नरः ॥ ३९ ॥ श्राद्धं

सपिण्डकं कृत्वा पिण्डदानं तथैव च ॥ कुलानां शतमुद्धृत्य विष्णुलोकं नयेत् पितृन् ॥ ३० ॥

३६ गदाधराद्दक्षिणतो यावत्तीर्थं मधुश्रवाः ॥ महानदी गतं चैव मृतानां स्वर्गकारकम् ॥ ३६

३१ ॥ दशाश्वमेधिके हंसे तीर्थे चामरकण्टके ॥ कोटितीर्थे हक्मिणी कुण्डे पिण्डदः स्वर्गा

न्नयेत् पितृन् ॥ ४० ॥ पिण्डदो धेनुकारण्ये कामधेनुपदेषु च ॥ स्नात्वा नत्वा कामदुघां ब्रह्म

लोकं नयेत् पितृन् ॥ ४१ ॥ कर्दमाले गयाना चौमुण्ड पृष्ठ समीपतः ॥ स्नात्वा श्राद्धादिकं

कुर्य्यात्पितॄणामनृणो न्नजेत ॥४२॥ मुण्डपृष्ठां नमे देवीं क्षेत्रपालादिसंयुताम् ॥ पूजयि-
त्वा न्नयं न स्याद्विषरोगादिनासिनीम् ॥४३॥ कामपीठं च कामाक्षीं पूजयेत्कामरूपिणीम् ॥
सर्वसौभाग्यकामो हि देवीं विंध्यानिवासिनीम् ॥४४॥ फल्गुचण्डीश्मशानाक्षीं मंगलां च
समर्च्चयेत ॥ गयायां वृषोत्सर्गात्त्रिसप्त कुलमुद्धरेत ॥४५॥ कुलानां शतमुद्धृत्य ब्रह्मलोकं
नयेत्पितॄन ॥४६॥ गया गजो गयादित्यो गायत्री च गदाधरः ॥ गया गयाशिरश्चैव षड्गया मु-
क्तिप्रदा स्मृताः ॥४७॥ गयाख्यानमिदं पुण्यं यः पठेत्सततं नरः ॥ शृणुयाद्वा श्रद्धया य-
स्तु स याति परमां गतिम् ॥४८॥ पाठयेद्वा गयाख्यानं विप्रेभ्यः पुण्यकृन्नरः ॥ गयाश्राद्धं

कृतं तेनैकृतं तेन मुनिश्चितम् ॥४९॥ श्राद्धकाले पठेद्यस्तु गयामाहात्म्यमुत्तमम् ॥ विधिहीनं तु सम्पूर्णं पितॄणां च गयासमम् ॥५०॥ उपाख्यानमिदं पुण्यं गृहे तिष्ठति यत्र वै ॥ सर्प्पाग्निचौरजनितं भयं तत्र न जायते ॥५१॥ महिमानं गयाया यस्तु यः शृणोति स लभ्यते परम ॥ तेनेष्टं राजसूयेन चाश्वमेधेन नारद ॥५२॥ पाठे ह्यपाठये ह्यपि पूजये ह्यपि पुस्तकम् तस्य गेहे स्थिरा लक्ष्मीः सुप्रसन्ना भविष्यति ॥५३॥ सूत उवाच ॥ सनत्कुमारो मुनिपुंगवाय पुण्यां कथां तत्र निवेद्य नत्वा ॥ स्वमाश्रमं पुण्यवनैरुपेतं विसृज्य संगीतगुरुं जगाम ॥५४॥ इति श्रीवायुपुराणे श्वेतवाराहकल्पे गयामाहात्म्ये

३७

ऽष्टमोऽध्यायः ॥ श्री ॥ ८ ॥ श्री ॥ श्री ॥ श्री ॥ श्रीसंवत १८०२ ॥ शाल ॥ मार्गशीर्षे
शुक्लपक्षे द्वादश्यां बुधवासरे सम्पूर्णं शुभं भूयात् ॥ लिखितं करणसिंहेन राजपूत·
वाशीगयाजीके ॥ श्रीराधाकृष्णाय नमः ॥ श्रीरामलक्ष्मण श्रीजानकी ॥ श्री ॥ श्री ॥ श्री ॥

गयामाहात्म्य

३८

३८